CAREERINDIA

# आदर्शप्रश्नपत्रम् – 2019-20
## कक्षा – XII
## संस्कृतम् (ऐच्छिकम्) कोड सं – 022)
## Sanskrit Elective (022)

**समयः – होरात्रयम्** **पूर्णाङ्काः – 80**

**सामान्यनिर्देशाः -**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 09 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 15 प्रमुखाः प्रश्नाः सन्ति।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम् -**

| | |
|---|---|
| **खण्डः (क) अपठित - अवबोधनम्** | **- 10 अङ्काः** |
| **खण्डः (ख) रचनात्मक - कार्यम्** | **- 15 अङ्काः** |
| **खण्डः (ग) पठित - अवबोधनम् संस्कृतसाहित्येतिहासपरिचयश्च** | **- 40 अङ्काः** |
| **खण्डः (घ) छन्दोऽलङ्कारपरिचयः** | **- 15 अङ्काः** |

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(iii) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(v) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

www.careerindia.com

CAREERINDIA

**खण्डः – क**

**अपठित - अवबोधनम्** 10 **अङ्काः**

1. **अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत -**

भाष्यते अनया इति सा भवति भाषा। अत्र चिन्तनीयः विषयोऽस्ति यत् किं वयं संस्कृताध्ययनतत्पराः संस्कृतानुरागिणः अनया संस्कृतभाषया भाषामहे? नो चेत्, कथं तावद्वयं संस्कृताध्येतारः भवितुमर्हाः? यद्यपि साम्प्रतिकेऽस्मिन् विविधभौतिकप्रपञ्चप्रधानैकभावमये युगे संस्कृतसम्भाषणं नातिसरलं तथापि दृढमतिर्भूत्वा यदि वयं संस्कृतेन वक्तुं प्रयत्नशीलाः भवेम तदा संस्कृतसम्भाषणं नातिकठिनं भविष्यतीति दृढो विश्वासः। यावद्वयम् अन्यभाषामाध्यमेन संस्कृतस्य अर्थावबोधने संलग्नाः भविष्यामः तावत् संस्कृतभाषया वक्तुं समर्थाः नैव भवेम। यद्यपि बहुभाषाज्ञानं निन्दनीयं नास्ति किन्तु निजभाषामुपेक्ष्य अन्यभाषानुरागो नैव श्रेयस्करो भविष्यति।अतः सङ्कोचं हीनभावं च विहाय विद्यालये समाजे च दैनिकव्यवहारे अधिकाधिकं संस्कृतसम्भाषणं करणीयम्। संस्कृतस्य गुणगौरवगानैः तस्याः प्रचार–प्रसारो नैव भविष्यति अपितु मातृभाषाशब्दबहुलायाः एतस्याः अधिकाधिकप्रयोगेण एव संस्कृतं पुनः जनभाषापदमारूढा भविष्यतीति नात्र सन्देहः।

**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** 1×2=2

**निर्देशस्पष्टात्मकपदम् –अवबोधनात्मकप्रश्नः**

(i) वर्तमानयुगे किं नातिसरलम्?

(ii) कः श्रेयस्करो न भविष्यति?

(iii) अधिकाधिकप्रयोगेण संस्कृतभाषा कम् आरूढा भविष्यति?

**(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** 2×2=4

**निर्देशस्पष्टात्मकवाक्यम् –अवबोधनात्मकप्रश्नः**

(i) कुत्र दैनिकव्यवहारे अधिकाधिकं संस्कृतसम्भाषणं करणीयम्?

(ii) चिन्तनीयः विषयः कः अस्ति?

(iii) वयं कथं संस्कृतभाषया वक्तुं समर्थाः न भवेम?

**( इ ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।** 1×1=1

**द्वित्रिशब्दात्मक-वाक्यम् - चिन्तनात्मकप्रश्नः**

**(ई) यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्) एकपदेन - ज्ञानात्मकप्रश्नः** 1×3=3

(i) 'तस्याः प्रचार–प्रसारो नैव भविष्यति' अत्र 'तस्याः' इति सर्वनामपदं कस्यै प्रयुक्तम्?

(ii) 'चिन्तनीयः' इति विशेषणपदस्य विशेष्यपदं किम्?

(iii) 'न्यूनातिन्यूनम्' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत।

www.careerindia.com

(iv) 'भाषामहे' इति क्रियापदस्य कर्तृपदं गद्यांशात् चित्वा लिखत।

**खण्डः – ख**

**रचनात्मक–कार्यम्** 15 **अङ्काः**

2. **अधोलिखित-पदेषु कानिचित् पञ्चपदानि आधृत्य पञ्चवाक्यानि संस्कृतेन लिखत –** 1x5=5

**रचनात्मकानि पञ्चवाक्यानि -चिन्तनात्मकप्रश्नः**

शिष्यः , मनः, माता, क्षत्रियाः, शिशुः, अश्वः, हरिणः, गुरूपदेशः ।

3. **प्रदत्ततथ्यानां सहातया अधोलिखितं विषयम् अधिकृत्य संस्कृतेन अनुच्छेदं लिखत –** 5

**दशवाक्यानि - प्रगतचिन्तनात्मकप्रश्नः**

**विषयः – सत्सङ्गतिः कथय किं न करोति पुसाम्।**

सत्सङ्गतेः अभिप्रायः

सतां सज्जनानां वा किम् आचरणम्

उदाहरणमाध्यमेन सङ्गतेः प्रभावः

सङ्गतेः लाभाः उपसंहारश्च

**अथवा**

**विषयः – चलभाषियन्त्रस्य सदुपयोगः**

जीवने विविधयन्त्राणां प्रयोगः

सर्वाधिकम् उपयोगियन्त्रम्

चलभाषियन्त्रस्य महत्त्वम् उपयोगित्वम् च

लाभाः हानयश्च

विवेकपूर्णम् उपयोगः

4. **निम्नलिखितवाक्येषु केषाञ्चन पञ्चवाक्यानां संस्कृतेन अनुवादं कुरुत -** 1x5=5

**पञ्चवाक्यानि – रचनात्मक-चिन्तनात्मकप्रश्नः**

1. देवेन्द्र मेरे मित्र नीरव का मित्र है।
2. उसने गायन में प्रथम स्थान प्राप्त किया था।
3. नीरव और देवेन्द्र कल मेरे घर आएँगे।
4. शाम को मेरे घर सङ्गीत का कार्यक्रम होगा।
5. तुम सब भी आ जाना।
6. हम सब सङ्गीतसन्ध्या का आनन्द प्राप्त करेंगे।
7. वहाँ मेरे आचार्य भी आ सकते हैं।

www.careerindia.com

**अथवा**

1. Devendra is friend of my friend Neerav.
2. He got first place in singing.
3. Neerav and Devendra will come to my home tomorrow.
4. There will be a musical program at my place in the evening.
5. You all must come too.
6. We all will enjoy the Sangeet Sandhya.
7. Even my teacher might come there.

**खण्डः – ग**

**पठित - अवबोधनम्  40 अङ्काः**

5. **अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –**

भवादृशा एव भवन्ति भाजनान्युपदेशनाम्। अपगतमले हि मनसि विशन्ति सुखेनोपदेशगुणाः। हरति अतिमलिनमपि दोषजातं गुरूपदेशः। गुरूपदेशश्च नाम अखिलमलप्रक्षालनक्षमम् अजलं स्नानम्। विशेषेण तु राज्ञाम्।विरला हि तेषामुपदेष्टारः। राजवचनमनुगच्छति जनो भयात्।उपदिश्यमानमपि ते न शृण्वन्ति।अवधीरयन्तः खेदयन्ति हितोपदेशदायिनो गुरून्।

**(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** 1×2=2

**निर्देशस्पष्टात्मकपदम् –अवबोधनात्मकप्रश्नः**

(i) कीदृशे मनसि उपदेशगुणाः सुखेन विशन्ति?

(ii) राजानः गुरून् कथं खेदयन्ति?

(iii) चन्द्रापीडसदृशाः केषां भाजनानि भवन्ति?

**(आ) पूर्णवाक्येन उत्तरत – ( केवलं प्रश्नद्वयम् )** 1½×2=3

**निर्देशस्पष्टात्मकपदम् –अवबोधनात्मकप्रश्नः**

(i) गुरूपदेशः नाम किम्?

(ii) जनः भयात् किं करोति?

(iii) गुरूपदेशः किं हरति?

6. **अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत -**

यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा,
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्,

CAREERINDIA

प्रोद्दीप्ते भवने च कूपखननं प्रत्युद्यमः कीदृशः।।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 1×2=2

निर्देशस्पष्टात्मकपदम् –अवबोधनात्मकप्रश्नः

(i) उद्दीप्ते भवने किं प्रति प्रयत्नः व्यर्थः?

(ii) विदुषा कस्मिन् प्रयत्नः कार्यः?

(iii) कलेवरगृहं कीदृशं भवेत्?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1½×2=3

निर्देशस्पष्टात्मकपदम् –अवबोधनात्मकप्रश्नः

(i) विदुषा कदा महान् प्रयत्नः करणीयः?

(ii) आत्मकल्याणाय कीदृशी इन्द्रियशक्तिः आवश्यकी?

(iii) कस्य क्षयात् पूर्वं विद्वान् जनः प्रयत्नं कुर्यात्?

7. अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –

कौशल्या – जात! अस्ति ते माता? स्मरसि वा तातम्?

लवः – नहि।

कौशल्या – ततः कस्य त्वम् ?

लवः – भगवतः सुगृहीतनामधेयस्य वाल्मीकेः।

कौशल्या – अयि जात! कथयितव्यं कथय।

लवः – एतावदेव जानामि।

(प्रविश्य सम्भ्रान्ताः)

बटवः – कुमार ! कुमार ! अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेष्वनुश्रूयते, सोऽयमधुनाऽस्माभिः स्वयं प्रत्यक्षीकृतः।

लवः – 'अश्वोऽश्व ' इति नाम पशुसमाम्नाये साङ्ग्रामिके च पठ्यते, तद्ब्रूत – कीदृशः?

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 1×2=2

निर्देशस्पष्टात्मकपदम् –अवबोधनात्मकप्रश्नः

(i) कौशल्या लवं किं कथयितुम् आदिशति?

(ii) 'स्मरसि तातम्' इति का पृच्छति?

(iii) बटुभिः कः प्रत्यक्षीकृतः?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम् ) 1½×2=3

निर्देशस्पष्टात्मकपदम् –अवबोधनात्मकप्रश्नः

(i) 'ततः कस्य त्वम्' इति प्रश्नस्य उत्तरं किम्?

(ii) 'अश्वोऽश्वः' इति कुत्र पठ्यते?

(iii) बटुभिः किम् अनुश्रूयते?

8. **पदानां समुचितार्थैः मेलनं कृत्वा लिखत – (केषाञ्चित् चतुर्णाम्)** ½x 4=2

**एकपदात्मकम् - स्मृत्यात्मकप्रश्नः**

| | |
|---|---|
| (i) समाः | ब्रह्मणा |
| (ii) अशेषम् | पाण्डित्यम् |
| (iii) उत्सङ्गे | आमन्त्रिताः |
| (iv) वैदग्ध्यम् | अङ्के |
| (v) विधात्रा | वर्षाणि |
| (vi) समाहूताः | सम्पूर्णम् |

9. **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत –(केषुचित् चतुर्षु)** 1×4=4

**एकवाक्यात्मकम् – ज्ञानात्मकप्रश्नः**

(i) <u>मनुष्याणां</u> हिंसावृत्तिस्तु निरवधिः।

(ii) मनुष्याः <u>परिकम्पमानकलेवराः</u> दुःखेन समयम् अतिवाहयन्ति।

(iii) भगवान् <u>त्वां</u> दीर्घजीवनं कारयतु।

(iv) शिववीरस्य विश्वासपात्रं <u>तोरणदुर्गं</u> प्रयाति।

(v) <u>राज्ञे</u> व्ययार्थं रत्नचतुष्टयं दास्यामि।

(vi) जनकादयः <u>कर्मणा</u> एव संसिद्धिम् आस्थिताः।

10. **अधोलिखितभावार्थे रिक्तस्थानपूर्तिं मञ्जूषापद सहायतया कुरुत – (कस्यचिदेकस्य)** 1×3=3

**चतुःपञ्चवाक्यानि - अवबोधनात्मकप्रश्नः**

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥

**भावार्थः –** संसारे सामान्याः जनाः विशिष्टानां (i) .......... जनानां व्यवहारस्य एव अनुकरणं कुर्वन्ति।श्रेष्ठाः जनाः यादृशम् (ii) ........... कुर्वन्ति अन्ये जनाःअपि तेषाम् आचरणम् एव (iii) ......... मत्वा तद्वदेव आचरन्ति।

**(आ)** नीरक्षीरविवेके तु हंसालस्यं त्वमेव तनुषे चेत्।
विश्वस्मिन्नधुनान्यः कुलव्रतं पालयिष्यति कः।।

**भावार्थः –** विवेकपूर्णनिर्णये हंसस्य एव (i)....... अस्ति।हंसवत् ज्ञानवान् विवेकी च जनः एव यदि



www.careerindia.com

स्वकर्तव्यपालने (ii) ............ करिष्यति तदा अन्ये ये विवेकिनः न सन्ति तेभ्यः (iii) ............ का आशा भवेत्।अतः विवेकिनो ज्ञानिनो वा जनाः स्वकर्तव्यं निष्ठया पालयेयुः।

**मञ्जूषा –** आचरणम्, वैशिष्ट्यम्, श्रेष्ठानां, कर्तव्यपालनस्य, आलस्यम्, प्रामाणिकम्।

11. **अधोलिखित-अन्वये रिक्तस्थानानि पूरयत - (केवलं पद्यमेकम्)** 1×3=3

**त्रिचतुर्वाक्यानि - अवबोधनात्मकप्रश्नः**

स मृन्मये वीतहिरण्मयत्वात्
पात्रे निधायार्घ्यमनर्घशीलः।
श्रुतप्रकाशं यशसा प्रकाशः
प्रत्युज्जगामातिथिमातिथेयः ॥

**अन्वयः** – अनर्घशीलः यशसा प्रकाशः सः (i)... ....... वीतहिरण्मयत्वात् मृन्मये पात्रे अर्घ्यं (ii) ............ श्रुतप्रकाशं (iii) ............ प्रति उज्जगाम।

**अथवा**

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः॥

**अन्वयः** – त्वं नियतं कर्म (i) ........................ अकर्मणः हि कर्म (ii) ........................।
अकर्मणःच ते (iii)........................ अपि न प्रसिद्ध्येत्।

12. **यथानिर्देशम् उत्तरत –**

**(अ) कर्तृपदं क्रियापदं च चिनुत - ( कस्यचिदेकस्य )** 1

**एकपदेन – ज्ञानात्मकप्रश्नः**

(i) किन्तुः नितान्तमनुतापं जनयति।
(ii) सभापतिरश्वत्थदेव उद्भिज्जपरिषद् विसर्जयामास।

**(आ) विशेषणं विशेष्यं च चिनुत - (केवलं एकम् )** 1

**एकपदेन – ज्ञानात्मकप्रश्नः**

(i) सः प्रतिमासमर्धाधिकं धनं धनादेशेन प्रेषयति।
(ii) पदे पदे दोधूयमानाः वृक्षशाखाः सम्मुखमाघ्नन्ति।

**(इ) वाक्ये प्रयुक्तं सर्वनामपदं कस्मै प्रयुक्तम्? (केवलम् एकम्)** 1

**एकपदेन – ज्ञानात्मकप्रश्नः**

(i) कोऽपि शिववीरस्य विश्वासपात्रं सिंहदुर्गात् तस्य एव पत्रमादाय तोरणदुर्गं प्रयाति।

www.careerindia.com

CAREERINDIA

(ii) नीरक्षीरविवेके तु हंसालस्यं <u>त्वम्</u> एव तनुषे चेत्।

**(ई) अधोलिखितं वाक्यं कस्मात् ग्रन्थात् गृहीतं कश्च तस्य लेखकः? (केवलम् एकम्)** 1

**एकपदेन – ज्ञानात्मकप्रश्नः**

(i) न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।

(ii) भो भोः! तत्किमक्षत्रिया पृथिवी? यदेवमुद्घोष्यते?

**(उ) कः कं कथयति? (केवलम् एकम् )** 1

**एकपदेन – ज्ञानात्मकप्रश्नः**

(i) प्रियच्छात्राः! किं भवन्तः जानन्ति यत् योगशास्त्रे शरीरस्य मनसश्च नियमनं प्रतिपाद्यते।

(ii) तीक्ष्णतरा हि आयुधश्रेणयः शिशोरपि दृप्तां वाचं न सहन्ते।

13. **(अ) अधोलिखितेषु कविषु केषाञ्चन चतुर्णां कवीनाम् एकैकस्य काव्यस्य नाम लिखत-** 1×4= 4

**पदद्वयात्मकम् - स्मृत्यात्मकप्रश्नः**

माघः, भवभूतिः, अम्बिकादत्तः व्यासः, दण्डी, भासः, बाणभट्टः

**(आ) अधोलिखितासु रचनासु कासाञ्चित् चतसृणां लेखकानां नामानि लिखत –** 1×4=4

**पदद्वयात्मकम् - स्मृत्यात्मकप्रश्नः**

नीतिशतकम्, पञ्चतन्त्रम्, अभिज्ञानशाकुन्तलम्, गङ्गालहरी, मेघदूतम्, गीतगोविन्दम्

**खण्डः – घ**

**छन्दोऽलङ्कारपरिचयः** 15 अङ्काः

14. **(अ) प्रश्नान् उत्तरत – ( केवलं द्वयम् ) एकपदेन-स्मृत्यात्मकप्रश्नः** 1×2=2

(i) तगणस्य रूपं लिखत।

(ii) पावका इत्यत्र को गणः?

(iii) भगणस्य किं स्वरूपम्?

**(आ) अधोलिखितपरिभाषाः पूरयत – ( केवलं द्वे )** 1×2=2

**एकवाक्यात्मकम्- स्मृत्यात्मकप्रश्नः**

(i) उपेन्द्रवज्रा ................................ ।

(ii)..........................तभजाजगौगः।

(iii) जतौ तु ..................... जरौ ।

www.careerindia.com

CAREERINDIA

**(इ) एकस्य छन्दसः उदाहरणं लिखत –** 1×1=1

**एकवाक्यात्मकम्- स्मृत्यात्मकप्रश्नः**

इन्द्रवज्रा, मालिनी, अनुष्टुप्

**(ई) अधोलिखित–पङ्क्तिषु किं किं छन्दः? ( केवलं त्रयम् )** 1×3=3

**एकपदेन-स्मृत्यात्मकप्रश्नः**

(i) सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।

(ii) स्वभाव एवैष परोपकारिणाम्।

(iii) कर्मणैव हि संसिद्धिमास्थिताः जनकादयः।

(iv) शरीरमात्रेण नरेन्द्र तिष्ठन् ।

15. **(अ) कस्यचिदेकस्य शब्दालङ्कारस्य सोदाहरणं लक्षणं लिखत –** 2×1=2

**त्रिचतुर्वाक्यात्मकम् - अवबोधनात्मकप्रश्नः**

श्लेषः, अनुप्रासः

**(आ) केवलमेकस्य अर्थालङ्कारस्य लक्षणमुदाहरणं च लिखत –** 3×1=3

**त्रिचतुर्वाक्यात्मकम् - अवबोधनात्मकप्रश्नः**

उपमा, रूपकम्

**(इ) अधोलिखितपङ्क्तिषु के अलङ्काराः? (केवलं द्वयम्)** 1×2=2

**त्रिचतुर्वाक्यात्मकम् - अवबोधनात्मकप्रश्नः**

(i) पश्यामि ते मुखपुण्डरीकम्।

(ii) यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः।

(iii) तस्माद् योगाय युज्यस्व योगः कर्मसु कौशलम्

---

www.careerindia.com